# Bhishmaproktam Vishnumahatmyavarnanam

# ભીષ્મપ્રોક્તં વિષ્ણુમાહાત્મ્યવર્ણનમ્

## Document Information

Text title : Bhishmaproktam Vishnumahatmyavarnanam

File name : bhIShmaproktaMviShNumAhAtmyavarNanam.itx

Category : vishhnu, vishnu, mahAbhArata, mAhAtmya

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | shAntiparva | adhyAya 200/2-16||

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2025

*sanskritdocuments.org*

# ભીષ્મપ્રોક્તં વિષ્ણુમાહાત્મ્યવર્ણનમ્

યુધિષ્ઠિર ઉવાચ ।
પિતામહ મહાપ્રાજ્ઞ પુણ્ડરીકાક્ષમચ્યુતમ્ ।
કર્તારમકૃતં વિષ્ણું ભૂતાનાં પ્રભવાપ્યયમ્ ॥ ૧॥

નારાયણં હૃષીકેશં ગોવિન્દમપરાજિતમ્ ।
તત્ત્વેન ભરતશ્રેષ્ઠ શ્રોતુમિચ્છામિ કેશવમ્ ॥ ૨॥

ભીષ્મ ઉવાચ ।
શ્રુતોઽયમર્થો રામસ્ય જામદગ્ન્યસ્ય જલ્પતઃ ।
નારદસ્ય ચ દેવર્ષેઃ કૃષ્ણદ્વૈપાયનસ્ય ચ ॥ ૩॥

અસિતો દેવલસ્તાત વાલ્મીકિશ્ચ મહાતપાઃ ।
માર્કણ્ડેયશ્ચ ગોવિન્દે કથયત્યદ્ભુતં મહત્ ॥ ૪॥

કેશવો ભરતશ્રેષ્ઠ ભગવાનીશ્વરઃ પ્રભુઃ ।
પુરુષઃ સર્વમિત્યેવ શ્રૂયતે બહુધા વિભુઃ ॥ ૫॥

કિં તુ યાનિ વિદુર્લોકે બ્રાહ્મણાઃ શાર્ઙ્ગધન્વનઃ ।
માહાત્મ્યાનિ મહાબાહો શ‍ૃણુ તાનિ યુધિષ્ઠિર ॥ ૬॥

યાનિ ચાહુર્મનુષ્યેન્દ્ર યે પુરાણવિદો જનાઃ ।
અશેષેણ હિ ગોવિન્દે કીર્તયિષ્યામિ તાન્યહમ્ ॥ ૭॥

મહાભૂતાનિ ભૂતાત્મા મહાત્મા પુરુષોત્તમઃ ।
વાયુર્જ્યોતિસ્તથા ચાપઃ ખં ગાં ચૈવાન્વકલ્પયત્ ॥ ૮॥

સ દૃષ્ટ્વા પૃથિવીં ચૈવ સર્વભૂતેશ્વરઃ પ્રભુઃ ।
અપ્સ્વેવ શયનં ચક્રે મહાત્મા પુરુષોત્તમઃ ॥ ૯॥

સર્વતેજોમયસ્તસ્મિઞ્શયાનઃ શયને શુભે ।
સોઽગ્રજં સર્વભૂતાનાં સઙ્કર્ષણમચિન્તયત્ ॥ ૧૦॥

આશ્રયં સર્વભૂતાનાં મનસેતિ વિશુશ્રુમ ।
સ ધારયતિ ભૂતાત્મા ઉભે ભૂતભવિષ્યતી ॥ ૧૧॥

તતસ્તસ્મિન્મહાબાહો પ્રાદુર્ભૂતે મહાત્મનિ ।
ભાસ્કરપ્રતિમં દિવ્યં નાભ્યાં પદ્મમજાયત ॥ ૧૨॥

સ તત્ર ભગવાન્દેવઃ પુષ્કરે ભાસયન્દિશઃ ।
બ્રહ્મા સમભવત્તાત સર્વભૂતપિતામહઃ ॥ ૧૩॥

તસ્મિન્નપિ મહાબાહો પ્રાદુર્ભૂતે મહાત્મનિ ।
તમસઃ પૂર્વજો જજ્ઞે મધુર્નામ મહાસુરઃ ॥ ૧૪॥

તમુગ્રમુગ્રકર્માણમુગ્રાં બુદ્ધિં સમાસ્થિતમ્ ।
બ્રહ્મણોઽપચિતિં કુર્વઞ્જઘાન પુરુષોત્તમઃ ॥ ૧૫॥

તસ્ય તાત વધાત્સર્વે દેવદાનવમાનવાઃ ।
મધુસૂદનમિત્યાહુર્વૃષભં સર્વસાત્વતામ્ ॥ ૧૬॥

ઇતિ મહાભારતે શાન્તિપર્વણિ ૨૦૦ અધ્યાયાન્તર્ગતં
ભીષ્મપ્રોક્તં વિષ્ણુમાહાત્મ્યવર્ણનં સમ્પૂર્ણમ્ ।

મહાભારત । શાન્તિપર્વ । અધ્યાય ૨૦૦/૨-૧૬॥

mahAbhArata . shAntiparva . adhyAya 200/2-16..

Proofread by PSA Easwaran

---

*Bhishmaproktam Vishnumahatmyavarnanam*

pdf was typeset on November 2, 2025

Please send corrections to *sanskrit@cheerful.com*